श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकपञ्चाशः सर्गः ॥

## मार्गे सुमन्त्रेण दुर्वाससो मुखादाकर्णितां भृगुशापकथां किञ्चिद् भाववृत्तं च वर्णयित्वा दुःखान्विताय लक्ष्मणाय सान्त्वनादानम्

तथा सञ्चोदितः सूतो लक्ष्मणेन महात्मना।
तद् वाक्यमृषिणा प्रोक्तं व्याहर्तुमुपचक्रमे ॥ **7.51.1** ॥

पुरा नाम्ना हि दुर्वासा अत्रेः पुत्रो महामुनिः।
वसिष्ठस्याश्रमे पुण्ये वार्षिक्यं समुवास ह ॥ **7.51.2** ॥

तमाश्रमं महातेजाः पिता ते सुमहायशाः।
पुरोहितं महात्मानं दिदृक्षुरगमत् स्वयम् ॥ **7.51.3** ॥

स दृष्ट्वा सूर्यसङ्काशं ज्वलन्तमिव तेजसा।
उपविष्टं वसिष्ठस्य सव्यपार्श्वे महामुनिम् ॥ **7.51.4** ॥

तौ मुनी तापसश्रेष्ठौ विनीतो ह्यभ्यवादयत्।
स ताभ्यां पूजितो राजा स्वागतेनासनेन च ॥ **7.51.5** ॥

पाद्येन फलमूलैश्च उवास मुनिभिः सह।
तेषां तत्रोपविष्टानां तास्ताः सुमधुराः कथाः ॥ **7.51.6** ॥

बभूवुः परमर्षीणां मध्यादित्यगतेऽहनि।
ततः कथायां कस्याञ्चित् प्राञ्जलिः प्रग्रहो नृपः ॥ **7.51.7** ॥

उवाच तं महात्मानमत्रेः पुत्रं तपोधनम्।
भगवन् किं प्रमाणेन मम वंशो भविष्यति॥ **7.51.8** ॥

किमायुश्च हि मे रामः पुत्राश्चान्ये किमायुषः।
रामस्य स सुता ये स्युस्तेषामायुः कियद् भवेत्॥ **7.51.9** ॥

काम्यया भगवन् ब्रूहि वंशस्यास्य गतिं मम।
तच्छ्रुत्वा व्याहृतं वाक्यं राज्ञो दशरथस्य तु॥ **7.51.10** ॥

दुर्वासाः सुमहातेजा व्याहर्तुमुपचक्रमे।
शृणु राजन् पुरा वृत्तं तदा देवासुरे युधि॥ **7.51.11** ॥

दैत्याः सुरैर्भर्त्स्यमाना भृगुपत्नीं समाश्रिताः।
तया दत्ताभयास्तत्र न्यवसन्नभयास्तदा॥ **7.51.12** ॥

तया परिगृहीतांस्तान् दृष्ट्वा क्रुद्धः सुरेश्वरः।
चक्रेण शितधारेण भृगुपत्न्याः शिरोऽहरत्॥ **7.51.13** ॥

ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः।
शशाप सहसा क्रुद्धो विष्णुं रिपुकुलार्दनम्॥ **7.51.14** ॥

यस्मादवध्यां मे पत्नीमवधीः क्रोधमूर्छितः।
तस्मात् त्वं मानुषे लोके जनिष्यसि जनार्दन॥ **7.51.15** ॥

तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्।
शापाभिहतचेतास्तु स्वात्मना भावितोऽभवत्॥ **7.51.16** ॥

अर्चयामास तं देवं भृगुः शापेन पीडितः।
तपसाऽऽराधितो देवो ह्यब्रवीद् भक्तवत्सलः॥ **7.51.17** ॥

लोकानां सम्प्रियार्थं तु तं शापं गृह्यमुक्तवान्।
इति शप्तो महातेजा भृगुणा पूर्वजन्मनि॥ **7.51.18** ॥

इहागतो हि पुत्रत्वं तव पार्थिवसत्तम।
राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद॥ **7.51.19** ॥

तत् फलं प्राप्स्यते चापि भृगुशापकृतं महत्।
अयोध्यायाः पती रामो दीर्घकालं भविष्यति॥ **7.51.20** ॥

सुखिनश्च समृद्धाश्च भविष्यन्त्यस्य येऽनुगाः।
दशवर्षसहस्राणि दशवर्षशतानि च॥ **7.51.21** ॥

रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति।
समृद्धैश्चाश्वमेधैश्च इष्ट्वा परमदुर्जयः॥ **7.51.22** ॥

राजवंशांश्च बहुशो बहून् संस्थापयिष्यति।
द्वौ पुत्रौ तु भविष्येते सीतायां राघवस्य तु॥ **7.51.23** ॥

स सर्वमखिलं राज्ञो वंशस्याह गतागतम्।
आख्याय सुमहातेजास्तूष्णीमासीन्महामुनिः॥ **7.51.24** ॥

तूष्णीभूते तदा तस्मिन् राजा दशरथो मुनौ।
अभिवाद्य महात्मानौ पुनरायात् पुरोत्तमम्॥ **7.51.25** ॥

एतद् वचो मया तत्र मुनिना व्याहृतं पुरा।
श्रुतं हृदि च निक्षिप्तं नान्यथा तद् भविष्यति॥ **7.51.26** ॥

सीतायाश्च ततः पुत्रावभिषेक्ष्यति राघवः।
अन्यत्र न त्वयोध्यायां मुनेस्तु वचनं यथा॥ **7.51.27** ॥

एवं गते न सन्तापं कर्तुमर्हसि राघव।
सीतार्थे राघवार्थे वा दृढो भव नरोत्तम॥ **7.51.28** ॥

श्रुत्वा तु व्याहृतं वाक्यं सूतस्य परमाद्भुतम्।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत्॥ **7.51.29** ॥

**ततः संवदतोरेवं सूतलक्ष्मणयोः पथि।**
**अस्तमर्के गते वासं केशिन्यां तावथोषतुः॥ 7.51.30॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकपञ्चाशः सर्गः॥